# रुद्राष्टकम् (संस्कृतहाईकू)

**प्रो. ताराशंकर शर्मा पाण्डेयः**
(राष्ट्रपतिसम्मानित)
सेवानिवृत्त आचार्य
साहित्य विभाग, ज.रा.रा.सं.वि.वि., जयपुर

**सिद्धं जलधौ**
**प्राकृतं शिवलिङ्गं**
**सम्पूजयितुम् ।। 1 ।।**

**श्रावणमासे**
**वारिवाहाभिषिक्तं**
**संसारलिङ्गम् ।। 2 ।।**

**संप्रतिष्ठते**
**सूत्थाननारायणं**
**स्थावरलिङ्गम् ।। 3 ।।**

**अचलं लिङ्गं**
**लोके स्याद्भावापन्नं**
**जगत्प्रतीकम् ।। 4 ।।**

**लोकैः समर्च्यं**
**रुद्राष्टाध्यायीमन्त्रैः**
**पार्थिवलिङ्गम् ।। 5 ।।**

**परं साधनं**
**मृत्युञ्जयात्मलिङ्गं**
**मोक्षाधिगत्यै ।। 6 ।।**

**वैभवप्राप्त्यै**
**लोकलोकैर्विभाव्यं**
**पारदलिङ्गम् ।। 7 ।।**

**योगक्षेमाय**
**सम्पूज्यं भक्तिभावैः**
**शिवदं लिङ्गम् ।। 8 ।।**

**इति जयपुरवास्तव्येन प्रो.ताराशंकरशर्मपाण्डेयेन विरचितं**
**रुद्राष्टकं (संस्कृतहाईकू) पूर्णतामगात्।**